National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
**NJHSR 2023;** 1(48): 207-209
© 2023 NJHSR
www.sanskritarticle.com

**डॉ.धर्मपालप्रजापतः**
सहायकाचार्यः(व्याकरणविभागः)
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नवदेहली- ११००१६

**Correspondence:**
**डॉ.धर्मपालप्रजापतः**
सहायकाचार्यः(व्याकरणविभागः)
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नवदेहली- ११००१६

# "प्रकर्षार्थमन्तरेण क्वचित्स्वार्थेऽपि तरबस्ति" इति ज्ञापकविमर्शः।

**डॉ. धर्मपालप्रजापतः**

भगवता पाणिनिना विरचितायामष्टाध्याय्यां सूत्रशैल्याः सर्वोत्कृष्टपरिमार्जितं परिष्कृतञ्च रूपं लभ्यते। एते षड्विधसूत्रप्रकारमुररीकृत्य अनुवृत्तिसाहाय्येन यथाशक्ति विषयं सूक्ष्मं व्यापकञ्च कर्तुं प्रायासन्। एतदर्थं पाणिनिना नानाऽनुबन्धानां प्रत्याहारादीनाम् आश्रयः स्वीकृतः। सूत्रेषु नैकानि तथ्यानि सांकेतिकरूपेण उक्तानि, तेषां तथ्यानां विस्तृतविवेचनायाः दायित्वं व्याख्याकाराणां स्कन्धेष्वापतितम्, तत्फलस्वरूपं खिलपाठाः स्वीकृताः।

एवंविधायाः लाघवरीत्याः स्वीकारे सति, प्रायः सर्वेषां तथ्यानां विवेचनं शब्दैः न कृतमाचार्यैः एतदर्थमाचार्यैः सूत्राणि रचितानि, एतैः सूत्रैः सूत्रांशैः वा कतिपयानां एतादृशाणां तथ्यानां सङ्केताः उपलभ्यन्ते, ये आचार्येण स्पष्टरूपेण नोक्ताः। एतादृशानि सूत्राणि सूत्रांशाः वा गूढतत्वयुक्ताः सन्तोऽपि व्यर्थाः प्रतीयन्ते, किन्तु शाब्दिकानां धारणा वर्तते नैकमप्यक्षरं व्यर्थम्। अष्टाध्याय्याः व्याख्याकारेषु प्रथिताः व्याख्याकाराः पतञ्जलिः, जयादित्यः, जिनेन्द्रबुद्धिः, हरदत्तः, भट्टोजिदीक्षितादयः व्यर्थैः सद्भिः सूत्रैः सूत्रांशैः वा तथ्यं ज्ञापयितुं प्रयासमकुर्वन्। "ज्ञापयति इति ज्ञापकः" ज्ञापकोत्पत्तौ चत्वारि तथ्यानि सहायकानि भवन्ति।[1]

**1. वैयर्थ्यम्-** येन सूत्रेण सूत्रांशेन वा किमपि तत्त्वं ज्ञाप्यते, तत्सूत्रं सूत्रांशो वा व्यर्थः निष्प्रयोजनो वा स्यात्।

**2. ज्ञापनम्-** व्यर्थं सत् सूत्रं सूत्रांशो वा किमपि तथ्यं ज्ञापयेत्।

**3. स्वस्मिन् चारितार्थ्यम्-** ज्ञापकनिष्पत्तेः अनु तस्य ज्ञापकस्य प्रकाशे तत्सूत्रस्य सूत्रांशस्य वा चारितार्थ्यं स्यात्।

**4. अन्यत्र फलम्-** सूत्रस्य सूत्रांशस्य वा चारितार्थ्येन सहैव ज्ञापकमन्यत्रापि चरितार्थं स्यात्।

**प्रकर्षार्थमन्तरेण क्वचित्स्वार्थेऽपि तरबस्ति।**

आचार्यपाणिनिना विरचितं सूत्रमस्ति "द्विवचनविभज्योपपदे तरबीयसुनौ"[2] अस्य सूत्रस्यार्थोऽस्ति" द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः।" अत्र भगवता पाणिनिना केवलमतिशायनार्थे/प्रकर्षार्थे एव तरप्प्रत्ययस्य विधानं क्रियते। किन्तु ज्ञापकसमुच्चयकर्त्रा आचार्यपुरुषोत्तमदेवेन ज्ञापकद्वारा तरप्प्रत्ययः स्वार्थेऽपि स्वीक्रियते। पुरुषोत्तमदेवानुसारं "तरप्तमपौ घः"[3] इति सूत्रं ज्ञापकाधारो वर्तते। कैयट-हरदत्त-नागेशभट्ट-भट्टोजिदीक्षित- वासुदेवदीक्षितादिभिः ज्ञापकमिदमुल्लेखितम्। एतेषां विदुषां विचारोऽस्ति यत् आचार्यपाणिनिना संज्ञिविधानानन्तरं प्रायः तत्प्रसङ्गे एव संज्ञाविधानमपि कृतमस्ति। यथा- लटः शतृशानचावप्रथमासमानाधिकरणे[4] इत्यादित्रिभिः सूत्रैः शतृशानज्विधानं क्रियते, विधानानन्तरं "तौ सत्"[5] इति सूत्रेण शतृशानचोः सत्संज्ञा क्रियते। इत्थम्प्रकारेणैव तरप्पूतमपोः घसंज्ञायै लाघवदृष्टिः अनुसर्तव्या। अर्थात् "अतिशायने तमबिष्ठनौ"[6]

द्विवचनविभज्योपपदे तरबीयसुनौ" इत्याभ्यां सूत्राभ्यां तरप्तमपोः विधानान्तरं "तौ घः" "तादी घः" "पितौ घः" इत्यादिलघुसूत्रन्यासेन द्वयोः प्रत्यययोः घसंज्ञा कर्त्तव्या आसीत्। किन्तुं भगवता पाणिनिना एवं न कृत्वा, "तरप्तमपौ घः" इति दीर्घसूत्रन्यासेन घसंज्ञा विहिता। अतः पुरुषोत्तमदेवादीनां व्याख्याकाराणां मते अनावश्यकगुरुसूत्र-न्यासेन इदं ज्ञापकं निष्कासयितुं शक्यते यत् "प्रकर्षर्थामन्तरेण क्वचित् स्वार्थेऽपि तरप्प्रत्ययो" भवति।

स्वार्थिकतरप्प्रत्ययस्य उदाहरणस्वरूपं विद्ववद्भिः पाणिनिना विरचितं सूत्रं "अल्पाच्तरम्"[7] कात्यायनविरचितं वार्त्तिकं "लोपश्च बलवत्तरः"[8] च (प्रत्याहाराह्निक) प्रस्तुतम् यदि "अल्पाच्तरम्" इत्येतस्मिन् सूत्रे तरप्प्रत्ययः प्रकर्षार्थकः मन्यते चेत् द्वयोः प्रातिपदिकयोः द्वन्द्वसमासे एव प्रवृत्तं स्यात् किन्तु नैकशब्दानां समासे प्रवृत्तं न स्यात्। इत्थमेव "लोपश्च बलवत्तरः" इति वार्तिके तरप्प्रत्ययः न कस्यचिदपेक्षया बलवदर्थकः मन्यते, अपितु सामान्यरूपेण विधानं क्रियते यत् प्रत्याहारेषु अनुबन्धानां ग्रहणं न, यतोहि अनुबन्धानां लोपो भवति। एवम्प्रकारेण विदुषां मते उपर्युक्तयोः द्वयोः शब्दयोः तरप्प्रत्ययः अतिशायनार्थे नास्ति। यद्यपि महाभाष्यकारः न स्वीकरोति यत् तरप्प्रत्ययः स्वार्थिकः।

महाभाष्ये "अल्पाच्तरम्" इति सूत्रव्याख्याप्रसङ्गावसरे तरप्प्रत्य-यार्थविषये द्वौ पक्षौ प्रस्तुतौ। प्रथमपक्षे प्रकर्षार्थकः अपरे च स्वार्थिकः। प्रथमः पक्षः तन्त्रः (विवक्षितः) अपरश्च अतन्त्रः (अविवक्षितः) उक्तः। एतयोः द्वयोः पक्षयोः समापतितानां गुणदोषाणां विवेचनाऽपि कृताऽस्ति। तन्त्रपक्षे अव्याप्तिदोषः तेन "शंखदुन्दुभिवीणानाम्" इत्यादि-प्रयोगेषु दोषः आपतति। एतस्य दोषस्य समाधाने भगवता पतञ्जलिनोक्तं "अल्पाच्तरम्" इत्यत्र तरप्प्रत्ययः व्यर्थः, अतः सूत्रस्य "अल्पाच्" इति रूपमेव स्वीकर्त्तव्यम्। अतन्त्रपक्षस्वीकारे "मृदङ्गशंखतूणवाः" "धनपतिरामकेशवानाम्" इत्यादिषु तेषु प्रयोगेषु दोषो भवति यत्र पूर्वनिपातोऽभीष्टो नास्ति, किन्तु इदं सूत्रं पूर्वनिपातस्यैव विधानं करोति। अत्र समागतदोषस्य समाधानं प्रस्तुतं यत् पूर्वं शङ्खकेशवयोः द्वन्द्वसमासः कर्त्तव्यः, तदनन्तरं "शंखतूणवौ" "रामकेशवौ' इत्यनयोः समासः क्रमशः मृदङ्ग, धनपतिः इत्याभ्यां सह समासः। मृदङ्गः धनपतिः इत्येतौ अल्पाच्छब्दौ अतः "अल्पाच्तरम्" इति सूत्रेण एतयोरेव पूर्वनिपातः। प्रथमपक्षेऽयं दोषो न भवति यतोहि नात्र तरप् प्रकर्षार्थकः। अतः धनतिपरामकेशवानाम् इत्यादिप्रयोगेषु "अल्पाच्तरम्" इति सूत्रस्य प्रवृत्तिः नास्ति।

काशिकावृत्तौ स्वार्थिकस्वप्रत्ययस्य नित्यतां साधयन्, आचार्यः अन्यस्वार्थिकप्रत्ययान् अपि नित्यान् स्वीकरोति। एतेषु प्रत्ययेषु तरप्प्रत्ययादारभ्य "अवक्षेपणे कन्"[9] इति सूत्रविहितकन्प्रत्ययपर्यन्तं प्रत्ययाः सम्मिलिताः सन्ति।

एतेन प्रतीयते यत् काशिकाकारोऽपि तरप्प्रत्ययं स्वार्थिकप्रत्ययं मनुते।

**पूर्वोक्तप्रयोजनद्वयस्य निराकरणम्-**

ज्ञापकस्य प्रथमप्रयोजनरूपेण प्रस्तुते "अल्पाच्तरम्" इति सूत्रे प्रयुक्तः तरप्प्रत्ययः न स्वार्थिकः यतोहि पाणिनिना द्वयोः प्रातिपदिकयोः अल्पाचः पदस्य पूर्वनिपाताय "अल्पाच्तरम्" इति सूत्रं व्यरचि। एतदतिरिच्य यथा काशिकायाम् उक्तम्- शंखदुन्दुभिवीणानाम् इत्यादिद्वयधिकशब्देभ्यः समासे पूर्वनिपातसन्दर्भे अनियम एव, तेन शंखदुन्दुभिवीणाः, वीणाशंखदुन्दुभयः इति प्रयोगद्वयं लभ्यते। धवखदिरपलाशाः इत्यादिप्रयोगेषु नियमो भवति, तत्र अतन्त्रपक्षे धनपतिरामकेशवानाम् इत्यादिप्रयोगेषु आपतितदोषसमाधानार्थं यः उपायः प्रदत्तः स एव उपायः तन्त्रपक्षेऽपि भवितुमर्हति। अर्थात् पूर्वं खदिरपलाशयोः समासः कर्तव्यः तदनन्तरं खदिरपलाशौ इत्यस्य धव इत्यनेन सह समास स्यात्, तेन स्वतः एव धव इत्यस्य पूर्वनिपातो भविष्यति।

इत्थमेव ज्ञापकस्य द्वितीयप्रयोजने "लोपश्च बलवत्तरः" इत्यत्र तरप्प्रत्ययः स्वार्थिक एव प्रतीयते। महाभाष्येऽपि अस्य वार्तिकस्य "लोपः भवति तावद्भवति" इत्यर्थः कृतोऽस्ति। किन्तु सत्यमिदमेव यदस्मिन् प्रयोगेऽपि तरप्प्रत्ययः प्रकर्षार्थे एव प्रयुक्तः। यतोहि एतस्मिन् वार्तिके उक्तमस्ति- यत् प्रत्याहारेषु अनुबन्धानां ग्रहणं न भवति यतोहि ग्रहणापेक्षयालोपः अधिकबलवान् भवति। एवम्प्रकारेण व्याख्यानेन तु (द्वयोः प्रयोगयोः दृष्ट्या) "तरप्तमपौ घः" इति सूत्रोक्तज्ञापकस्य न काचित् आवश्यकता। किन्तु आमुप्रत्ययः गुणक्रिययोः प्रकर्षकः, अतः उच्चैस्तराम् इत्यादिस्थलेषु तरप्प्रत्ययः स्वार्थिकः स्वीकर्तव्यः एव, नान्यः कश्चनोपायः। अतः एतद्दृष्ट्या ज्ञापकस्वीकारे न काचन आपत्तिः।

**आक्षेपः तत्समाधानञ्च**

आचार्यपुरुषोत्तमदेवेन प्रसङ्गतः अत्र पूर्वपक्षरूपेण शङ्का प्रकटिता यत् यदि संज्ञिनः प्रसङ्गात् भिन्ने प्रसङ्गे संज्ञाविधानम् उपर्युक्तप्रकारेण संज्ञिनः स्वरूपातिक्रमे लिङ्गत्वेन स्वीकर्तुं शक्यते तर्हि "निष्ठा"[10] इति सूत्रेण भूतकाले विहितयोः क्तक्तवतुरूपसंज्ञिनोः प्रसङ्गात् भिन्ने प्रसङ्गे "क्तक्तवतू निष्ठा"[11] इति सूत्रेण एतयोः निष्ठासंज्ञायाः विधानं कृतम्। अतः भिन्नप्रसङ्गे संज्ञाविधानकारणात् अयं निर्देशोऽपि ज्ञापकत्वेन स्वीक्रियते यत् क्तक्तवतू सदैव भूतकालस्य एव वाचकौ इति आवश्यकं नास्ति।

अस्य समाधानं पुरुषोत्तमदेवेन एवं कृतं यत् ज्ञापकं प्रत्यक्षादिप्रमाणवत् प्रस्तुतवस्त्वाधारेण प्रवृत्तं प्रमाणं नास्ति। अभीष्टरूपाणां सिद्धये आवश्यकतथ्यस्य सूचनामात्रं प्रददाति। क्तक्तवतुप्रसङ्गे भूतकालस्य बाधो नाभीष्टः अतः तत्र तत्सम्बन्धिज्ञापकं नोचितम्। एतस्मिन् सन्दर्भे पुरुषोत्तमदेवेन एवम्

उदाहरणं प्रस्तुतम्। ‘‘ऋतेरीयङ्’’[12] एतत् सूत्रापेक्षया ‘‘ऋतेश्छङ्’’ इति सूत्रन्यासे लाघवम्। ‘‘आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्’’[13] इति सूत्रेण छस्थाने ईयादेशे कृते अभीष्टार्थस्य प्राप्तिः भवितुमर्हति। तथापि सूत्रकारेण एतत् नाङ्गीकृतम् एतदाधारेण ज्ञापकं कृतं यत् धातुभ्यः विहितप्रत्ययानां स्थाने आयनाद्यादेशाः न भवन्ति।

येन प्रकारेण ‘‘ऋतेरीयङ्’’ इति सूत्रात् ज्ञापकं प्राप्तं, तथैव तद्धितप्रत्ययस्य ईयसुनः विधायकात् ‘‘द्विवचनविभज्योपपदे तरबीयसुनौ’’ इति सूत्रादपि ज्ञापकं प्राप्तुं शक्यते यत् तरबीयसुनौ इत्येतस्य स्थाने लाघवदृष्ट्या ‘‘तरप्छसुनौ’’ इति वक्तव्यम्। अतः गुरुसूत्रन्यासः एतद् ज्ञापयति यत् तद्धितप्रत्ययानां स्थाने आयनाद्ययादेशाः न भवन्ति। किन्तु यथापूर्वमेव स्पष्टं, ज्ञापकं केवलम् अभीष्टार्थप्रतिपत्तये भवति, अनभीष्टप्रयोगाणां प्राप्तये न। अत्र तद्धितप्रत्ययेषु आयनाद्यादेशानाम् अभावः अभीष्टो नास्ति। अतः तरबीयसुनौ इति सूत्रांशेन ज्ञापकं नैव स्वीकर्तुं शक्यते। अपितु तरबीयसुनौ इति सूत्रांशः स्पष्टार्थप्रतिपत्तये एव। शब्दकौस्तुभे तरबीयसुनौ इति सूत्रांशः प्रक्रियालाघवाय स्वीकृतः।

**सन्दर्भः-**

1. ए.डिक्शनरी ऑफ संस्कृत ग्रामर, पृ. 151
2. अष्टाध्यायी 5/3/59
3. अष्टाध्यायी 1/1/22
4. अष्टाध्यायी 3/2/124
5. अष्टाध्यायी 3/2/129
6. अष्टाध्यायी 5/3/44
7. अष्टा. 2/2/34
8. महा.भा.प्रत्याहाराह्निकम्।
9. अष्टाध्यायी 5/3/94
10. अष्टाध्यायी 3/02/102
11. अष्टाध्यायी 01/01/26
12. अष्टाध्यायी 3/01/29
13. अष्टाध्यायी 7/01/2